निर्दिष्टस्याप्यप्राधान्यदर्शनात् ।

इह . . . युक्तस्याप्यप्राधान्यं पश्यामस्तथा कर्म, कामस्तु
प्रयत्नानस्यानिरूहैर्वा हरेन्मलान् . नच मलानिर्हरणे निरूहाच्च
. . . किं तर्हि निरूहणं कथं गम्यत इति चेत् निरूहगु-
णाव्याख्यानात् यस्मान्निरूहगुणान्वानन्तरमाचष्टे नपच-
ज्ञानि रूहोबलमग्निं च विज्वरत्वं मुदं . . . परिपक्वेषु दोषे-
षु प्रयुक्तः शीघ्रमोहादिति तस्मादग्रेऽभिधानात् प्राधान्यमि-
ति प्रहीणमेतत् प्राधान्यात् पुन . . . अभिधानं प्रधानं च वायु-
बाह्याभ्यन्तराणां अर्थानां षड्भ्यो ज्ञान्तिमत्वात् तत्र
बाह्यानां तावद्धारणे धारणं . ज्वलनो ज्वलनमित्येवमादिना

शुभानामर्थानां निवृत्तौ वायुर्निमित्तं भवति। अशुभानां तु बाह्यानां शिखरि शैखरोपमेन मेवमादीनामभ्यन्तराणामर्थानां निवृत्तौ निमित्तं वायुस्तन्त्रयन्त्रधर इत्येवमादीनां शुभानामभ्यन्तराणां शारीरं नानाविधैर्विकारैरुपतापत्येवमादीनां किंचान्यच्छीघ्रकारित्वात्।

नचैवं पित्तश्लेष्माणः शीघ्रकारिणो यथा च मुक्तं हि - अतिशीघ्रकारिणमत्यविक्रमं मुनेशम्य . . . . प्रकुपितमपि कफमग्रहे संरक्षितुमभिधास्यामि प्रागेवैनमत्य इह भयादिति। किंचान्यत्, भूयस्तरं विकारोपदेशास्, आह - नायं प्रधानो वातप्रकृतीनां मला ना भिध्यात्।

उक्तं हि - कस्माद्वात प्रकृतयः प्रायेणाल्पबलाश्चाल्पायुषश्चाल्पसाधनाश्चाल्पापत्याश्च भवन्ति। उच्यते - नचायमाभ्यन्तरेषु अर्थेषु वायोरेव प्राधान्यं. तथा चैवोदाहृतं वायुस्तन्त्रयन्त्रधर इत्येवमादि। नचैकदेशात्समत्वेन प्राधान्यव्युदासः शक्यः कर्तुं. उक्त्वा शुभार्थकर्तृत्वं प्रति अस्यैवाविशेषवत् सामर्थ्यं दृश्यत इत्यतोऽयमेव परार्थ्य आह। समासः कस्माद्वातपित्तकफाः शारीरो दोषसंग्रह इति न क्रियताम् - ब्रूमहे - द्रव्यावकाशदानार्थं असमासे नाहि द्रव्याण्यपि च वाताद्यधिष्ठितानि विशेषव्याधिकराणि भवन्तीत्येतत्कथं ज्ञापितं स्यादित्यरतः कथितो व्याख्यात इत्यर्थः।

कथमिति शारीरो दोषसंग्रहः शरीरे भवश्शारीरः, दोषाणां संग्रहो दोषसंग्रहः उद्देश इत्यर्थः। संग्रहग्रहणं चेदं विस्तरस्य वक्ष्यमाणस्यावद्योतकमिकथमित्ययमेषामुद्देशो विस्तरः पुनरस्तरनावक्ष्यते त्युक्तो रौक्ष्यवैः षड्हीनमध्यपदं कथ्य षडित्येवमादि। आह — वायुः पित्तं कफश्च शारीरदोषसंग्रहः इत्यसत, रक्तस्यापि दोषस्य संभवात् पृथक् चाहेतुलक्षणस्था नत्या नान्तविकारो भवति।

संज्ञापदेशादि भवनादीनां दोषाणां । लिङ्गं हेत्वादि विशेष-
कृतं कथमिति । यदि चैषां वातपित्तश्लेष्मणामेको हेतुरे-
कं च लक्षणं स्यात्, स्थौल्यौ वायुरेकत्वमेषां कल्प्येत, न त्वमनु
पित्तं च तु तेषां हेत्वादीनां प्रतिशेषं नियमस्तस्माद्देषां त्रि-
त्वमेते वा हेत्वादयो धर्मा विशिष्टाः शोणितेऽप्युपलभ्यन्ते,
हेतुस्तावद्दानादि विशिष्टः कालेवानुपसेवनादिति लक्षणम-
पि तपनीयेन्द्रगोपाहं पद्मालक्तक सहमेवमादि स्थानं तु
यथावास्ते प्रकृतीनिवानादीनां तथा प्रजोपि कर्मत्व . . .
मेतयोः ब्रूमहे -
नाप्रतिज्ञानान्न कश्चिद्दृश्येतत प्रतिज्ञानेन स्वातन्त्र्यमस्वात-
न्त्र्यं वा कर्मत्वे यो हेतुर्यो हेतत प्रतिजानीते, तस्य पवमानानु-
वासयोरप्यकर्मप्रसङ्ग इवानिष्टेन, इदमुक्तं तस्मादन्यत्कारण-
मुपलभ्यामहे - आह, उच्यतां तर्हि कोऽन्यो हेतुः कर्मत्वव्यव-
स्थापको यो वमनादिषु पञ्चस्वनुयात्यापि यातिचस्नेहस्वे-
दाभ्यामिति तन्नोदनवमन . . दोषाघातसामर्थ्यमिति . . .
तयोरपि समार्थितं प्रतिदोषमेकस्य प्राधान्येन विघातसामर्थ्य-
मिति चेत्, सातित्वप्रसङ्गात, यदि त्वियं समर्थयसे प्रतिदोष-
विघाताय यस्याविशिष्टं सामर्थ्यं तस्य कर्मत्वं व्यवस्थाप्यते ।
एवं च सति त्रित्वमेव प्रसंक्ष्याति कर्मणां न पञ्चत्वं, कथं त्रित्वं
नामेति वदामः, वमनं श्लेष्महराणां विरेचनं पित्तहराणां वस्ति-
र्वातहराणामित्थं मुनिभिः वातादीनां शान्त्यै प्राधान्येन वर्त-
न्त इत्येवं त्रिषु कर्मसंशब्दनं प्राप्नोति, नाशीरो विरेचनानु-
वासयोः अथ प्राधान्येऽपि तयोर्दोषनिघातः, प्रतिकर्ममेव,
किमिति न स्वप्नलोचन को धादीनां पाचन बृंहण दीपनीयानां
चौषधानां तस्मादकर्मणि शिरोविरेचनानुवासने प्राप्नुतः ।

कर्माणि वक्ष्यन्ते, कर्माणीह संदोषनिर्हरणे ज्यायस्त्वं शक्त: क-
र्मत्वव्यवस्थाने कारणमवहितव्यं. न खलु तथा स्नेहस्वेदौ दोष-
संघातमेव हन्तुं समर्थौ यथा, पञ्चापि पवमानाश्च्य: भवेन्ननु
नामस्नेहेऽप्यायुक्त: पित्तं मातरिश्वानं च पराकरोति. स्वे-
दादयश्च पवनकफशमने तु कृत्स्नाशुध्यानिर्हरात.
न जातु चिद्दीर्घकालप्रचितं दोषराशिं यथासकलमा-
शु चानिर्हन्ति वमनादीनि। तथा स्नेहस्वेदौ कथं तर्हि भक्-
त्स्नं च कालान्तरे च समभिधानाच्च सर्पिषः, इह सर्पिषः श-
क्ति दोषाणां [illegible] निर्हारकं सर्पिर्हि स्नेहाद्वातं शमयति संस्ता-
रात कफं शैत्यात पित्तमुष्णात चोपशमयति।
यथा सर्पिरेवमन्येऽपि स्नेहग्राह्या: प्रधानस्नेहे-
भ्य: सर्पिस्तन्नावार्यं शमनश्च . . . . न निर्हारइति शेषेष्येतदे-
वानुमातव्यम। स्वेदेष्वेषैव वदेत स्याद्विचारणा. आस्थापना-
नुवासनयोरप्यशमकत्वात। आस्थापनानुवासने खल्वपि स-
मीरणं शमयते न निर्हरत:. तस्माच्छापन्नं नते कर्मण्य: क्रतो
दोषानिर्हरणे ज्यायस्त्वपरिहरणात। अयं हेतु: कर्मव्यवस्था-
पनायेष्ट:। उतनेवं तद्दोषानिर्हरसौ ज्यायसि शमकेऽपभवत:
तथापि कर्मसंज्ञे।
नन्वेवं स्नेहस्वेदादापि शनै: कुर्वा . . - कर्मसमाख्यां
वस्येऽपि विशेष. ये भवानि यत्तु तुल्ये नाम शमनकर्तृत्वे पूर्व-
यो: कर्मत्वं प्रख्याप्यते. नोक्तयोरिति. उच्यते- नाविवादान-
कस्तावदेतद्विवदते- निरूहानुवासने पवनमपरत इति।
अचार्ये निर्दिष्टतरया वहुश: तस्मिन रक्त . . . तस्मिन रक्त-
नाहास्तु स्त्रोतसां . . - कृन्मूलम प्लीहा चाविकारा रक्तार्शां-
सि प्रदररक्तगुल्म शोणितातिसारा: आचार्य - -

शोणितजा रोगाः प्रजायन्ते पृथग्विधाः रक्तोऽपि रोगाश्चेत्ये-

वमादयः उपक्रमेऽपि वयस्थास्थापनानुवासनं खलु सर्वोप-

क्रमेभ्यो वाते प्रधानं मन्यन्ते, विरेचनमपि पित्ते सर्वोपक्र-

मेभ्यो वमनं श्लेष्मणि सर्वोपक्रमेभ्यः तथा रक्तस्याप्युप-

धातुनः उपक्रमे स्रावणं शोणितस्य चेत्यादि दोषसंज्ञा।

कफवातेगतप्राये पित्तं शोणितमेव च ।

यदि कुप्यति दोषस्य क्रियमाणे चिकित्सिते ॥

यथोल्बणस्य दोषस्य तत्र कार्यं भिषग्जितम्।

तस्माद्रक्तस्यापि हेत्वादिभेदोपपत्ते र्वातादिवद्दुष्टत्वमिति।

एवं चोक्ते चत्वारो दोषास्तिष्ठं च दोषाणां व्यवस्थितो भ-

वांस्तस्मात् क्षोभ्यत एव, तत्तीर्थान्तरीयसंप्रतिपत्तेश्च

तीर्थान्तरीयाः शल्यशलाकार्थे कृतः एवं प्रतिपेदिरे, र-

क्तमपि दोष इत्युच्यते।

नहि कुप्यति रैकात्धातुमनरसमाधानत्वाच्च, नखलु रुक्ष-

तीक्ष्णादेर्वातादि कोपकाल हेतो रन्यं रक्तस्य जनकं हेतु-

मुपलभामहे- यद्यपि स्वाकाले चानवसेचनादित्यत्राप्यु-

द्रेकेण निमित्तं तीक्ष्णोष्णादिभिः खलु हेतुभिरुपचित-

स्य ऋतुकालेनुपसेच्यमानस्य भूयसे भवत्यभिवृद्धि ती-

क्ष्णोष्णादिभ्य एव कालेभ्य उक्ताकालमासेव्यमानेभ्य-

स्तत्पुनरवसेकात् प्रशाम्यति, स्याद्यथायं मधुरतिक्तभाव-

सेकात् प्रशमं लभते, तत्किमिदं सदृशमभिधीयते, नास्य

व्यतिरिक्तं हेतुमुपलभामहे इत्यवसेकात् प्रशाम्यतीति भो-

चमादावेवावनतिमात्र प्रदुष्टे रक्ते मधुरशीततिक्तादीनु-

पयुञ्जीत, लभते, प्रशमं च दीर्घकाल प्रदुष्टे स्वप्रमाणानि

... क्ते शोणिते यद्यप्युपयुक्त मधुरादिस्तथाप्यस्य

तेतथाविधौ धातुं समर्था भवन्त्यन्यतास्से का पुर्यो कंव
हृदौषाणां पुनर्दोषावसेचनमेव कार्यम।

नहि अभिन्नेसेतौ कल्कलप्रसेकोऽसि ...

स्येनत्पक्षस्य तथा, एवमेतल्लक्षणादयोधर्मास्समुपादिष्टा:
शोणितस्यते खल्व ... -सादीनामपि धातूनां उपपद्यन्ते
मांसस्य ह्यन्यो हेतुरन्यश्चमेद: प्रभृतीनामागमो हि अभिष्य-
न्दीनि ओघ्यानि स्थूलानि च गुरूणि च मांसवाहीनि दुष्यन्ति,
भुक्त्वा च स्वपितो दिवेत्येवं मेद: प्रभृतीनां लक्षणमप्यन्नं मां-
सस्यान्नं मेद: आदिभ्य: स्थानमपि विशिष्टमांसवहानां तु
स्रोतसां तालुमूलं च स्वमेदो वाह्यानां तु स्रोतसां प्रकरे मूलं
धाच्चकपावमानश्च ... शेपे मांसस्याधिमांसावर्बुदकण्ठ-
तालूकण्ठिका: मेदसोऽपि निर्दिष्टा .. प्रमेहाणां पूर्वरूपा-
णि यानि चेत्येवं शेषेष्वपि वाच्यम- उपक्रमोऽपि विशिष्टो
मांसजानां तु संशुद्धि: शस्त्रक्षाराग्निकर्मवत्तद्या दयुपक्रम-
निर्देशश्चापारक्षीरांबुदाहवत तद्यथा क्षीरोदकसंबन्धे-
ऽन्यवयवे दृश्यमाना: कथयन्ति लोके, अम्बुना स्वोदर्या:
क्षीरेण स्वादन्धाऽइति तदिहापि रक्ताधिष्ठानेन दोषेण
जनिते व्याधौ रक्तजेयमित्युपचारो भवतीति तथा वातादि-
कचित्सायं रक्ताद्याधिष्ठानस्य दोषस्याधिष्ठानापेक्षया
क्रियमाणायामुपचारमात्रं ह्यतो रक्तस्य चिकित्सा ..
मेदसश्चिकित्से . . सर्वमाखिलेष्वपि समप्रतिपेद्यो धार-
मपुरस्कार्यम।

तथैवेदं रसाद्दीनाधिकृत्योदाहृतं तस्मात्समानो यं धर्मो रक्त-
स्य रसादीनां च धातूनां मलानां च विशिष्टहेतुलक्षणादयो-
नन्य लक्षणादि विशेषोऽपि रसादीनां मलानां च दोषत्वं

तस्मादुत्सृज्यतामसद्ग्रहः।

यत्पुनरिदं दोषसंज्ञाविधानात् शोणितं दोष इत्यना-
पि संचक्ष्महे - न कर्तृत्व साधर्म्यं दोषशब्दस्य पीडाकरत्वे-
ऽप्यन्येष्वप्यर्थेषु दोषशब्दो निरूपितस्तथा भिदं...
परऋषिप्रवृत्तं वचः स्वयं प्रवृत्तं तद्दोषमुपेक्षेत। हिता-
शनैस्तथा दोषेभ्यस्तिस्रस्ते हि कासश्वासतृष्णोपजायते।
तस्माद्यः कश्चिद्वातादिभ्यातिरिक्तो नोऽप्यर्थः। पीडाकर-
स्तत्रापि दोषसंज्ञोपचारः प्रयुज्यते वातादिभिः पीडा-
कर्तृत्वसाधर्म्यात्तद्धर्मभावाद्धि तच्छब्दमित्युपनीतमे-
तत्। तन्नायुक्तं। यत्पुनरिदमुदितं तीर्थान्तरीयसंप्रति-
पत्तेरिति तन्नानभ्युपगमात्।

न खलु यद्यद्यं तन्त्रान्तर्थीणां असम्बन्धं परगृहीतं तदर्थं म-
प्रतिपद्येमहि, तद्यथा - केषांचित्स्वष्टकर्माणि विषा-
द्यौ द्रव्यारसगुणवीर्यपाकप्रभावाः पदार्थाः। षडिन्द्रिया-
णि पञ्चरसा एवमादि चान्यत् परीक्षान्नहि नो विचार्यमा-
णं तादिह प्रमाणतीर्थान्तरीयाणामिव अपि च केषांचि-
न्न दोषो रक्तं किं चान्यत् प्रकृत्यसंभवात्। इतश्च न रक्तं
दोषो न यस्माद्रक्तप्रकृतिर्नोपदिष्टः। भवतो चेदमयम-
पि दोषः कल्पयितव्यतास्यापि वातादिवत् प्रकृत्युपदेश-
माचार्यः प्रयोक्ष्यते। न तु प्रायुङ्क्त। तस्मान्न दोषो रक्तमिति।

किंचान्यद्विशेषाणां दाहे सत्यपि ... दृष्टो विशेषः,
क इति वातादिभिः दुष्टं रक्तं विकारान्जनयति। नादुष्टं, न तु
रक्तं वातादीन् कदाचिद्दूषयितुं वारयति। तस्मान्न दोषः। अहि-
तं सति धातुषु दोषः प्रसज्यन्ते ह्योन्योन्यं दूषयन्ति।
तानि कं हि स्रोतांसि स्रोतांस्येव धातवश्च धातून प्रदूषयन्ति,

तेन धातवोऽपि हि प्राप्ता दोषाः, उच्यते – नोऽन्योन्यत्वात् कालेन परस्परं दूषयन्ति। यच्चान्यमभिदधतः यथा दोषाः प्राप्ताः न दूषयन्ति

नैवं कदाचित् दूष्याणि रसरक्तादीनि दोषान् वातादीन् दूषयन्ति, अतश्च गौणमेषां नाम दूष्याणि तान्यपि दोषाणि। प्रदूषणाच्च दोष इति स्यात्। तथापि हि यदि दूष्याणि तान्यपि दूषणाच्च दोषा इति स्यात्। अत्रापि हि यदि दूष्याणि तान्यपि दूष्याणि प्राप्तो वातादि दूष्यत्वं दोषस्तेऽपि हि स्वैर्निदानै दूष्यन्ते, दूषिताश्च विकारान् जनयन्ति। यथैवास्रादयो धातवो वातादिभिरेवं च कृत्वा रसादयो वातादयश्च दूष्यत्वं प्राप्नुवन्ति, रक्तादयस्तु हेतवो दूषयन्त्येव नित्यं नान्ये सति दूष्यन्ते

ब्रूमहे – नोभयात्मकत्वान्निदानं हि कस्यचिद्दूषणं दोषास्तु नित्यं दूषणा एव, न शमनाः, कदाचिदपि दूष्याणि वातरक्तादीनि नित्यं तेषां वातादिभिः दूषणं न जनकत्वात् रक्तं दोषः कस्मादित्यविशेषाद्यदि . . . जनकत्वात् रक्तं दोषः कस्मादित्यविशेषाद्यदि . . . जनकत्वात् स्याद्रक्तं दोषं तेन निदानदोषदूष्याण्यपि जनकत्वाद्दोषा भवेत् . . . विपरीताश्च सर्वविकारविशेषाभिनिवृत्तिहेतुर्भवत्युक्तः तस्माज्जनकत्वाविशेषेऽपि नैव रक्तं दोष इति, तस्मात्तु दूरमपि गत्वा त्रय एवैते दोषास्तदूष्यत्वमनोपपद्यते।

न चान्यावकाशः। आह – किमन्येऽपि कश्चिद्दोषोऽस्ति, यस्याविशेषकं शरीरस्य रूपमुच्यते, तेजसः, तत्र ... मनसि भवो मानसः। अहङ्कारः त्रिःप्रकारः कतरश्चेति, तदुच्यते रजश्च तमश्च उद्दिष्टं लक्षणभेदं वक्ष्यामः, एवं शारीरे यथावदुक्तलक्षणस्थान विकारौ त्रिक्रमांशांशबलविकल्पादिभिर्धर्मान्तरैः स्नव-

... ...

उद्दिष्ट एवउद्देशः मात्रां सत्वमात्रमेव तेन सामान्येन व्याख्या-
याभूतवा पुनः उद्दिष्टः येषु ये पु प्रदेशेषु प्रसंगगतो मानसो
दोषउपसंहृत स्तेषु तेषु देशमात्रेण न तथा वातादय इति पुन-
रुद्देशेन प्रकाशयति. न केवलमिहैव प्रकरणे यदि पैत्तिको
नाभावे व्यवदेस्य शास्त्रकारस्याभिप्रायः एवमेवसूत्रमनुकारि-
व्यशायुः पित्तः कफश्चेति शारीरोदोषसंग्रहः मानसोरजस्तम.
श्चेति तस्मादेवमेतत्वथ्ये नर्तं तदस्माभिरिति गृह्यताम्
(२)
अनुजोग्रहणंचाद्दौ प्राधान्यात न ह्यरजस्तम इत्युपदेशात
असमानस्तज्ञात व्याधीनामन्योन्यानुबन्धाप्रसक्तः.
शारीरोमानसमनुबध्नाति. मानसश्च शारीरं तथाशारीर-
श्शारीरमानसो मानसं. उदाहरणंहि आगन्तरन्वेतिनिजे
निजविकारस्तथागमनुमतिप्रबन्धः।
एतस्यार्थः. स्यात्तथा प्रसक्तिः प्रकाशिता स्यात्देत्येत-
निमित्ताः समासोविहितः. तथाश्रयस्य परस्पर पीडानुब-
न्धनार्थमुक्तं हि शरीरमनुविधीयते, सत्वसत्वं च शरीरं च
शब्दानिर्धारणायन तृतीयोऽस्ति. सत्वं दोषइत्याह— तत्राकिमे
तयो
तयोश्शारीरमानसौ दोषयोः शक्यमप्रतिकारं कर्तुमनेनेति.
उच्यते —— शाम्यते भेषजैः पूर्वैः कीदृशैरिति दैवमयुक्ति-
व्यपाश्रयैर्युक्तिव्यपाश्रयैश्च।
तत्रदैवव्यपाश्रयं मन्त्रौषधमणिमङ्गलानि, युक्ति-
व्यपाश्रयमाहारौषधद्रव्याणां यथासंभवं योजनात्तदेतैर्वि-
विधैर्भेषजैस्साधनैरित्यर्थः। शाम्यते शमनमापाद्यते पूर्वः
इति प्रथमः. शारीरो वातादिभिर्दैवव्यपाश्रयस्य त्वादौ प्रा-
धान्यादुपदेशः. कथं पुनरस्य प्राधान्यं. सद्यश्शमकत्वान्च.
यदाहमन्ता आशुफलं . . . इति तयोः पृथं अल्पक्लेशत्वाच्च,

यथा चौषध्योज्ञारणप्रयोजना, कुष्ठे पाश्यवहाराणामि-
त्येवमादयः के श्रीद्रव्येषु दृश्यन्ते नातिमेन्द्रादिषु सन्ति।

अथ मानसः केनेत्युच्यते ज्ञानविज्ञानधैर्यस्मृति-
समाधिभिः तत्र ज्ञानं शास्त्रं विज्ञानं तदर्था . . .
स्मृतीरिति क्रान्तार्थानुचिन्तनं धैर्यमुन्नतिश्चेतसस्त्वा-
वष्टम्भ इत्यर्थः समाधानं पुनर्विषयेन्द्रियेभ्यो निवृत्य चे-
तसः आत्मनि य . . . यमं ज्ञानं चाविज्ञानं च धैर्यं च स्मृति-
श्च समाधिश्च ज्ञानविज्ञान स्मृति समादिभिः तत्र च ज्ञान-
स्य ज्यायस्त्वादग्रेनिकृतो निर्देशः ज्यायस्त्वं पुनरस्य सद्-
ज्ञाने तदर्थावबोधादयो यस्मादुक्ताभिधर्मशास्त्रान्तमन्त्
तदर्थावबोध स्तेनाथ . . . हः सत्वस्य सत्वावष्टम्भाद्धि मा-
नसो व्याधिनान्तरेलभते।

वचनं हि — भीरूणामुत्कृष्टसत्वानामेवमादि तथा . . .
स्मृतेः कार(ण)स्य मानसव्याध्युपशमः। आगमो हि स्मृ-
त्या स्वभावं भावानां स्मरन् दुःखाद्विमुच्यते- समाधियो-
गः, समाधानेन च दुःखोच्छित्तिनिमित्तं उदाहरणमाभयो-
गो मोक्षेन सर्वासां वेदनानां . मे . वर्तनं, सर्वे स्वात्विमे
भावाः समाधन्तानान्तरेण शास्त्रं तस्मात्तस्यैषां निबन्धन-
मनोज्ञानं प्रधानमित्युपपन्नमथो क्तदोषाः। ननु तेषाम्-
ते लक्षणात पृथक्त्वमभिज्ञातुं शक्यते, तस्मादुपदिश्यता-
मेषां मन्यत्वस्य ज्ञापकं लक्षणे सति च वक्तव्ये वायोरेवा-
वत प्राक्पारिस्त्रुतं तस्योपादिश्यतामुच्यते-

रूक्षः शीतो लघुः सूक्ष्मश्चलोऽथ विशदः खरः असमासो गुणान्त-
रस्य पाचन दारुणादेः असमासादनुक्तादपि गृह्यन्ते, दारु-
णादयोऽन्ये गुणानाम गुणबहुत्वे त एव ज्यायांस इत्यतः

खल्वपीमे एवोपन्यस्ता: . . . एवं गुणो वायु: प्रकोपमापन्नः

कथं शाम्यति. उच्यते – विपरीतगुणै द्रव्यै मारुतस्सं प्रशाम्यति

तत्र प्रतिलोमं विपरीतं प्रतिपक्षं प्रत्यनीकमित्यर्थः। विपरीत-

गुणान्तरस्य पावको दारुणादि. तदिदं विपरीतगुणं. तैर्विप-

रीतैः कस्यविपरीतशब्दस्य . . . तत्रविपरीतद्रव्यं यत्र

समानजातीयं. तद्यथा चित्रक श्लेष्मणो गुणैस्तु विपरीतता:

यथा काश्चित्रकमस्वादिश्लेष्मणाः।

यदि चायमाचार्यस्याभिप्रायो वा भविष्यत. गुणविपरीतै . .

. . वावदिक्षत. अतो विपरीतै विपरीतै गुणै श्चेति गृह्यताम।

अन्येतु विपरीतै गुणैरित्येतदेव केवलमिच्छन्ति. नवि-

परीतशब्दमर्थं लक्षानिर्दिष्टमनुमन्यन्ते, कस्मादिति –

भूयिष्ठं हि गुणैरेव द्रव्याणि कर्म कुर्वन्ति. इत्येवं दर्शयन्नोधर्म-

माह – विपरीतगुणभूयिष्ठम . . . तेशमाय तत्कस्मान्नाधि-

क्रियते. इत्युच्यते – तस्य तथा असामर्थ्यात सत्यमास्ते. तन्न-

तु तन्नथा शमायसमर्थं. यथा विपरीतगुण मत एवाचार्यस्सं-

प्रशब्दा. प्राथमुक्ता विपरीतगुणै . . . प्रशाम्यति, नतथा

विपरीतगुणभूयिष्ठैरिति. तस्मात सं प्रशब्दग्रहणाद्विपरीत-

गुणा भूयिष्ठमपि द्योतयाति।

ननु तथा तस्य सामर्थ्यमित्यत्र साक्षाद्विपरीतगुणभूयिष्ठग्र-

हणमकार्षी दथपित्तंकोहागेत्युच्यते. सस्नेहमुष्णतीक्ष्णं च

द्रव्य . . . कुड तत्र समान सहे पान्निर्देशार्थेषु संशब्द प्रति-

सन्देह इहायं संशब्दोऽर्थेषु समादिषु नियुक्तं. तत्र समाना-

र्थे तावत सादृश्याद्य तएवेति दृश्यन्ते, . . . समास्य भाव:

सादृश्यं समानजनं थेषां त इमे सदृशाः तद्भावस्सादृश्यं सहार्थे

सस्फलपिच्छ मल्पाल्प बहुश्च सप्रवाहिकं सहफलेन सस्फलं-

सहापित्त्वं यथा सर्पिस्त्वं तथा सह क्षीरं वातगुल्म . . . .

नु सह क्षीरैणेत्यर्थः

ईषदर्थे सतिक्तकषायाः शर्करा ईषत्तिक्तेत्यर्थः। निर्दिष्टो

रक्ततावास्थितः श्लेष्माणमुरस्थित मुपमृज्य विहरत्यूर्ध्वमः

ध्वास्तिर्यक्च तथा वा पिण्डितत्वात् गुल्म इत्युच्यते, वध्यते स

मुहुराध्मायाति वा सुव्यादिष्टः खल्वयं सशब्दे नानिर्दिश्यते।

उच्यते सहार्थः। ईषदर्थे वा सह स्नेहैन सस्नेहं ईषत्स्नेहं वा

सस्नेहमिति कथं गम्यत इति सर्पिष्वानोपदेशाद् हुतं हि

पित्तप्रतिकाराधिकारेऽल्प . . . सर्पिश्च स्नेहनं अन्

श्य दोषहरणमिति, तद्यादि पित्ते प्रकर्षेण स्नेहः स्यादतापि श्ले-

ष्माणि वा सर्पिषः प्रयोगो। संस्कृतस्य प्रतिषिध्येत सर्वमन्यत-

पूर्वेण तुल्यं व्याख्यानं केवलं प्रशब्दस्सम्यगर्थे प्रयोज्य श्लेष्म-

णः प्रशमं यान्ति, विपरीतगुणैर्गुणाः आह - कस्मादिदमानी सूप-

पन्नादीनां, विपरीतगुणैर्द्रव्यैः श्लेष्मा (शमयन्ति) शाम्यति.

उच्यते— विशेषदर्शनार्थं गुणवृद्ध्या हि गुणोपशमाच्च शमइत्ये-

तस्याविशेषस्या . . सः कथमनेन युक्तेन श्रुतास्यादित्यत एव मः

ध्य . . . गुणात् प्रत्याख्याय द्रव्यस्य वृद्धिप्रचयौ प्रादुस्तः

इति. आह— तत्किमेत . . द्रव्यैर्निरपेक्षैरेव व्याधिग्रहः

क्रियते, उत काश्चिदपि क्षीणैरित्युच्यते, देशमात्रा कालोपपादि-

तैः देशाद्युपात्त पादनानपेक्षैरित्यर्थः। तत्र देशस्थानमिति

यो ब्रूयात्मात्राप्रमाणमित्याकांक्षा कालसर्पिरादीनि प्रयोज्या-

नि तानि विपरीतान्यपि सत्यादन्नाद्येतत्वादन्न . . . त्पः प्रयोगा-

दिभ्यो हेतुभ्यो दोषाणेव संपद्येरन्।

यदा तु देशस्वभावं विज्ञाय तदानुरूपेण मांसानि भेष-

जानि विपरीतगुणान्यादत्ते, तैर्भेषजैः सा . . .

किंविनिवर्तन्ते विविधं निवर्तन्ते, नातिघ्नन्तीत्यर्थः, नैविका-
शाध्याधय इत्याभिलाषः, किं सर्वेऽपि हि साध्यसंगताः, साध-
नीयाः साध्या इत्यर्थः।

संमता अभिप्रेताः साध्या इति सम्मताः साध्यसम्मताः, आह-
सर्वविपर्ययानुपपत्तेः। न खल्वेकान्तेन विपरीतमौषधं किंचित
भेषजमुपपद्यते, पञ्चमहाभूतात्मकत्वात् द्रव्याणामस्या-
  . . कल्पनायामाश्रीयमाणायां विपरीतगुणभूयिष्ठमेवो-
पपद्यते, नाविपरीतगुणमुच्यते, न सामान्याधिकारिचे-
न्नैते . . . आविविपरीतत्वे वचनीया आह — गुणैरिति,
वीर्यविपाकानामसंभवः विपरीतगुणाभिधानाविपरीतगु-
णैरेव हन्ति भेषजैरिति प्राप्तं, ननु विपरीतवीर्यविपाकादि-
भिरनिष्टं चैतदुपपद्यते, न गुणग्रहणस्याविशेष्याभिधा-
नात गुणग्रहणं खल्विदमविशेष्याभिहितं, नह्युक्तासौना-
मगुणाः कारणसाध्यगुर्वाद्यो वेति विशेष्योक्तं, कस्मात
गुणैरित्यविशेष्याभिहितत्वात।

यावान्कश्चिद् गुणो विपरीतस्सर्वः प्राप्नोति, एवं च कृत्वा
वीर्यविपाकादयोऽप्युपसंगृहीता भवन्ति, आह देशमात्राका-
लानिर्देशो दोषेऽप्यनभिधाने प्रयोजनम्, वचनम्, इह देशोमा-
त्राकालश्च त्रय इमे निर्दिष्टाः, न तु दोषभेषजबलशरीराहा-
रसात्मसत्त्वप्रकृतिवयात्य . . . तस्मादुक्तव्यं . . . प्रयोजनं,
कस्माद्दोषादीनां न कृतो निर्देश इति, उच्यते- न तत्प्राधान्याद-
ष्टविधवीर्यवत्तद्यथा विंशतिभ्यो गुर्वादिभ्योऽष्टौ गुणा वीर्य-
  . . स्तत्प्राधान्यं, तेषां तु गुर्वादयोऽष्टवीर्यान्न तदेहा . . .
देशमात्राकालाः, उक्तं च — मात्राकालाश्रयाः युक्तास्तथा मा-
त्रां कालं च प्रमाणीकृत्येति, उत वा देश . . . दोषधः

कथं देशास्तु भूमिशातुरश्च, तत्रातुरो दोषादीनां संभवः कस्मिन्नयं भूमिदेशे जातः संवृद्धो व्याधितो वेति. अ-स्मिंश्च भूमिदेशे मनुष्याणामिदमाहारजातं इदं विहारजा-तमिदमाचारजातमेतावद्बलमेवंविधं सत्वमेवंविधो दो-षो भवतीत्क्रीगति, यमिमे व्याधयो हितमिदमाहितमिदमिति. तदातस्मादातुरः परिक्षे . . . . . बलमागमादिषु भेषज-स्य ग्रीष्ममूलानि भेषजस्याग्रीष्ममूलानि शीशीरेवाशरदि क्षीरकण्ठावचोहेमन्ते साराणि यथर्तुरपुष्पफलानीति फल-मावान्तेच दौर्बल्यं हि सर्गादिन्योर्बलं मध्येबलं दत्ते श्रेष्ठ-मग्रेविनिर्दिशेदिति शरीरस्य कृत्स्नशरीरवृद्धिकरास्तु इमे भावा भवन्ति।

तद्यथा कालयोगस्वभावसंसिद्धिरेवमादि आहार-स्यापि तत्तान्नपानं मधुरं लघुशीतं सात्म्यमिति सात्म-स्यापीत्युक्तं, कृतस्यात्म्यं सर्वेष्टाहारव्यपाश्रयं सत्वस्यका-लस्य जातियोगायोगमिथ्यायोगात् समनस्कमिन्द्रियवि-ज्ञानमापन्नं सुबुद्ध्यापधानाय सम्पद्यते। प्रकृतौ हठकृशो-णित प्रकृतिकाल गर्भाशय प्रकृतिमेवमादि वयस्तत्तवा-लमपरिपक्व मधातुमजातव्यञ्जनं सुकुमारमक्लेशसह माषोडशवर्षमुपादिष्टमेवमादि भेषजं मात्रयायुक्तं. मा-त्तास्याशो मात्रा तस्यादयः एवमेतत् आह – देशमात्रा-कालोपपन्नैरिति वाक्यम – कृमीन भिषजोपपादितत्वान (चिकित्सन औपचारे)
भिषक्स्वलूपपाद इतउनवाचारादिकत्वात् णिचोऽस्यसि-द्धमाह – द्रव्यैरित्थ स्वल्पाक्षरो योगः, किं भेषजग्रहणे नो-च्यते. भेषजग्रहणे नान्नपानौषधं विपरीतत्वशास्त्रो, उतवा आहारविहारौ भेषजग्रहणा दर्शयति –

आह — निवर्तन्त इति कार्यं क्रमो न विविधप्रकाशनार्थत्वा-
द्विविधं निवर्तन्ते केचिच्चिरेण केचित्क्षिप्रं केचि मध्य-
मेन योगेन, तथा केचित्संग्रहेण, केचिद्वमनेन, केचिद्विरे-
चनेन, केचिदास्थापनेन, केचिच्छमनेनोक्तं हि जीवनीयं
बृंहणीयच्छेद . . . यं भेदनीयं सन्धारणीयं दीपनीयमि-
त्येवमादि, यावद्वयःस्थापनमिति।
आह — रोगा इत्यत्राक्षरस्तु योगः उच्यते, तद्धर्मप्राप-
णार्थत्वान्न क्रमेवं धर्मस्य प्राप . . र्थः करस्येति सर्वो हि
विकारो विक्रिया भवस्य मादधाति, रुग्लक्षणस्तु रोगः
इति कृत्वा सर्वो विशेषेण रुक्करः स्यात्। न चैषां गव्यं गाति.
न क्रमशादिषु दृष्टो धर्मविकृतिस्त्वन्यथा पाक्रिशक्रय-
स्येति सर्वता विकारोऽनुपपन्न एवं धर्मः सर्वो विकारः स्वभा-
वमुपपद्य विशेषमन्यमादधात्याश्रये स्यात्, गद इत्यस्तु
एवमपि गदो गर इत्युक्त्वा सन्देहः स्यात्, किं न गरो भेद इति
आह स्यात् . . . गद इति कश्चैवं सति दोषः स . . . नगा-
भिधानो हि गदः, तस्य विपरीतान् भेषजान् एवं . . स्यात्।
न चैतदनुमन्यामहे - प्रसिद्धत्वाच्च, प्रसिद्धतरं चैतल्लोके व्या-
धिरस्तु नोक्त्वा द्विविधदुःखमादधाति इति व्याधिः,
व्यंगादिष्वयं धर्मो नास्तीति रोगत्वाभावः स्यादित्यपि निवृ-
त्तिर्वा विपरीतान् भेषजाद्ध्य य एवं विधं दुःखमादधाति सः
एव विपरीतनशाम्यति।
नान्यादित्यामय इति कार्यः, समानाक्षरेना विकारेणेति
न कश्चिद्विशेषो गभिहितो भवति, यस्माज्ज्वराभिधाने तु एका-
दशैलक्षणे सन्तापलक्षणे च व्याधौ स्याद्विपरीतेनशान्ति-
नोप्याप्सीत, तस्माद्यथान्यासमेव साध्यार्थ

(ध्या)
यदि साध्याम . . . सम्मता इत्ययं विग्रहं तेन तर्हि साध्या इत्ये-
वमेवाक्रियतां · ~~कृकस्समाग्रहणात्~~ कृच्छ्रसाध्यमप्युपगृ-
ह्णातीति तदेतदेकेन . . . साध्यग्रहणात् कथमिति । इह
साधनीयः साध्यः स च द्विविधः, सुखसाध्यं कृच्छ्रसा-
ध्यं च स्यात् साध्यधर्मनिमित्तैः कृच्छ्रसाध्यस्यान्तरेणा-
श्रयं तं लक्ष्यत एव, तस्मात् साध्यग्रहणे नैव प्राप्तत्वात्
कृच्छ्रसाध्यस्यापि न करणीयं संमतग्रहणं तेन विग्र-
हान्यथान्यत्वं च व्यवस्थापयति - साध्याश्च सम्मताश्चेति
संमता याप्याः, क्षेमिति यथोक्त गुणानां भिषजामाह -
किं साध्यत्वेन संमताः ब्रूमो न साध्यत्वं प्रति । किं तर्हि चिकि-
त्सारम्भं प्रति । तेषामपि चिकित्सावचनात् उक्तं हि याप्यं य-
त्नेन यापयेदित्यन्यथा संमतग्रहणे कृच्छ्र कृच्छ्रसाध्याभि-
धाने द्विविधस्यैव हि साध्यस्य चिकित्सारम्भः स्यात्, स या-
प्यः साधनीयः असाध्य इति कृत्वा वेदं य[illegible] तमन्त्राशक्य-
मिह ज्ञापयितुं तदेतत् संमतग्रहणादभिव्यज्यते इति तद्वयम-
नुमन्यामहे -
कस्माद् निवर्तन्त इति वचनान्नयाविनिवर्तन्ते, तत . . .
संमतग्रहणाद्याप्योऽपि . . . अविध्यन्नाकारिष्यदेवं विनि-
वर्तन्त इति ग्रहणं विशेषेण, तस्मात् पूर्वसंहितैः पाठः स्याद्यास्मि-
न्पाठे . . . कुतोधारात् सत्त्ववच्छरीरसंपदुपेता साध्या-
इत्यस्त्विति ब्रूमः । संमत ग्रहणमसं प्रति [illegible]थाय . . .
विदुषां यथार्थज्ञानमिति निश्चितानं वैधेयानन्त एव विपरीतै-
र्हि निवर्तन्ते, न तु ये अकुशलैरसाध्या इति गृहीता . . . द्वौ पु-
रुषौ सर्वव्याधितरं . . . भवति तद्यथा · गुरुव्याधिरेकः सत्त्व-
बलशरीरसंपदुपेतो लघुव्याधिरिति [illegible]

इत्यारभ्यावर्त्तते, यथा गुरुव्याधेर्लघुव्याधेरप्यसाध्यत-
. अल्पदोषमल्पमात्रं संशोधनकाले महत्संशोधनं प्रयच्छ-
न्तो भूय एवास्य दोषमुदीरयन्तीति अतस्स . . ग्रहणमुपदे-
यं संमता आचार्येण . . . त्येषोऽभिप्रायः, तस्मात् आद्यो
विग्रहो नयादि अन्यथा संमतग्रहणं सैवाभिधायकस्मिन्नय-
माचार्यः प्रतिकरणे संमते ग्रहणमवादि अत . . मेवसानि
ह्येवंविधा रोगा स्साध्या दारुणसंमता . . .

न चाप्यसिन्याप्य संभवः, किं तर्हि ये दारुणा इति संमता आ-
चार्येणेत्येषोऽभिप्रायः, तस्मादाद्यो विग्रहो नवि चाल्यन्त इ-
ति अभ्युपगन्तव्यमाह - उक्तानि भवता गुणानां कर्माणि वि-
परीतगुणैर्द्रव्यैर्मारुतस्संप्रशाम्यति, न त्विमानि नैव गुणकर्म-
ण्युतान्या . . . कानि चेत्तानि इत्युच्यते। व्याख्यातो यथा
द्रव्यं गुणकर्माणि वक्ष्यति, कोऽर्थ इत्युच्यते, व्याधौ देशानि क-
हुतराणीत्यर्थः। केभ्यः पूर्वादिभ्यो गुणकर्मभ्यः कानि बहु-
. . णि गुणानां कर्माणि वक्ष्यत्याचार्यः -

कथं वक्ष्यति यथाद्रव्यं द्रव्याणि कृत्येणेत्याकृत्यासिद्धिः, ए-
को गुणो मधुराम्लादिः गुरुलघ्वादिर्वा प्रतिद्रव्यं विशिष्टस्तद्य-
था मधुर एको द्राक्षेक्षुरसशालितण्डुलीयकादिषु, स च प्र-
तिद्रव्यमाश्रितो विशिष्टां क्रियां करोतीत्येतद्वक्ष्यत्याचार्यः -
आत्रेयभद्रकाप्य . . . ज्ञापनत्विये चाथवा तन्ते यतायत
द्रव्ये यो गुणो यस्य यस्य कर्मणः कर्तेत्यथवा स्मात् परेणा-
तो भूयः पुनरप्युक्तः, किमुक्तं भवति, उक्तानि गुणानां कर्माणि
अतः परेण तु पुनरपि वक्ष्यते - एकशस्ते - तानि तु यथाद्रव्यं
यथा मधुरा मधुरपाके ग्राहिण्यो रूक्षा उष्णा नलाकुण्ठकाम-
मधुरश्चाम्लपाकश्चाविकिला . . .

एवमादीनि च यथाद्रव्यं द्रव्यमधिकृत्य गुणानां कर्माणि व-
क्ष्यति. आह, न यथेहातिशयमाने न विपरीतगुणद्रव्यै-
र्मारुतः संप्रशाम्यति. उत . . . . वा यथाद्रव्यगुणकर्माणी-
ति वक्ष्यति, अथाहेतुहेतुत्वानुरूप्येण गुणानां कर्माणि व-
क्ष्यति, तद्यथा - गुरुकठिनविशदसान्द्रस्थूलगन्धगुणबहु-
लानि पार्थिवानि. तेषां च पार्थिवानां गुणानां कर्म उपचयसं-
घात गौरवादि कर्तृता. कैयत्स्याततो यथाद्रव्यं गुणकर्माणीति
वक्ष्यतीत्याह -- वक्ष्यति भवते तदिदमेव ताभ्यां क्रियमा-
णा इच्छामहागे तद्दिदं भवतापि त . . . कटु च श्लेष्मामम-
धुर इति च विद्यः, कोऽयमम्लो महाभवः कटुमधुरो वा उ-
च्यते - रस एवेह। विस्पष्टो नैनावसीयते. कौ नामार्थं रसः न-
नः प्रकाशे वाच्यते. रसनार्थो रसः रसनस्यार्थो रसार्थः, रसन-
विषय इति चार्थेभ्यः विशिष्टे शब्दादीनां विशेषणमिदमाश्र-
येऽत्र यमेवासन गोचरार्थः. . . . सोऽन्यशब्दादिरिति त-
स्य रसमधिकृत्य निर्दिशति द्रव्यमित्याधारो हेतुर्वेत्यभिप्रा-
यः स्यात्।
कथमेतल्लभ्यते द्रव्यशब्दोऽयं हेत्वाधारौ वक्तीति. अन्यत्रा-
पि वचनात् तस्मा . . . विप्रकरणे द्रव्यशब्दो हेत्वर्थमाधा-
रार्थं च . . . तस्मादिहाप्युपपन्नं. हेत्वाधारार्थाभिधानी य-
था वक्ष्यति -- चरतो विश्वरूपस्य रूपद्रव्यं यदुच्यते रूपहेतुरि-
त्यर्थः। तथा रसादीनां चैव शब्दः रसद्रव्यभेदे हेतोरभेदे नेत्यर्थः
तथा पञ्चेन्द्रियद्रव्याणि हेतव इति कामस्तथा, एषां हि विदि-
तमाहारतत्त्वं गुणको द्रव्य इति वा तदुपपन्नम्। हेत्वाधारार्थाभि-
शब्देन
धान द्रव्यशब्देन स्यात्। किं तद्द्रव्यमित्युच्यते - आपः, ताभिर्वा-
यो हेतुश्चाधारश्च . . . आह - किमपरमेव भवते।

क्षितिस्तथा केन प्रकारेण हेत्वाधारत्वेन प्राधान्यस्य प्रदर्शि-
यिष्यता हेतुत्वं प्रत्याधारत्वं असमासः कृतः आपश्चैव गृ-
गृहीता एतमेवार्थं हृदयं स्तथा शब्दमाभिप्रायोक्त प्रधाने-
[illegible] प्रधानं गृह्यते [illegible]

यथाहि, अपां तथा याया तो यथा गौस्तथा गवय इति हिम-
वान् गौश्च प्रधानौ परियात्र गवयौ नाहि कदाचि . . .
मुपमानं तयोरुपमेययोः क्रियते - तथा पारियात्रस्तथा-
हिमवान् यथा गवयस्तथा गौरित्येव हि हाप्यपां रसव-
त्वात् रसाभिनिवृत्तौ हेतुमत्वमपि निवृत्तस्य चाधारा-
पं कथमिति तुल्यजातीयादेव कारणाद्धाभिनिवृत्तिर्य-
था खलेभ्यः तिलानां शालिभ्यः शालीनां शुक्लाभ्यां शु-
क्लानां तन्तूनां कृष्णेभ्यस्तन्तुभ्यः कृष्णस्य . . . . .
. . न्यरसस्यापि निवृत्तिरेवं हेतुत्वमाधारत्वमपि रस-
स्य . . वृत्तेः, न ह्यन्यस्यापि गुणो वैशेषिकोऽन्यत्र वर्त-
त इति कृ [illegible] सापि हेतुराधारश्च-
भवति. कश्चात्र विशेषतः स्वेन गुणेन स्वेन . . पो रसवत्त्वः
परगुणेन तु रसेन न ह्रीति क्षितौ भिरुक्ताभिर्महाभूतानि खं
वायुरग्निरापः क्षितिस्तथा॥

शब्दः स्पर्शश्च रूपं च रसो गन्धश्च तद्गुणाः ।
तेषामेकगुणः पूर्वो गुणवृद्धिः परे परे ॥

पूर्वः पूर्वगुणश्चैव क्रमशो गुणेषु स्मृत इत्यनेन. तथास्याप्रा-
धान्यं, तदेवं रसवत्वादनयोर . . . पृथिव्योर्हेतुत्वं रसाभि-
निवृत्तावाधारत्वं च न तु रसवत्वादनयोर्भूतयोर पृथिव्यो-
र्हेतुनिवृत्तिः तस्यां निवृत्तौ विशेष्यते तेनाविशेषणं वा विशे-

विशिष्यते विशेषणं चाश्रयान्तरेभ्यो यस्याश्रय ....
भवति मधुरादि रसः तस्मिन् विशेषे च शब्दः रससमुच्चये न केव-
लायां वृत्तौ न केवले विशेषे, किं तर्हि उभयत्रापि वृत्तौ चाविशेषे
विशेषणे च प्रत्ययो निमित्तं कर्तारः इत्यर्थः। क इति, खादयः
खमादिर्येषां त इमे खादयः। खवायुतेजांसि त्रय इति संख्या.
पिण्डोऽर्थः। रसस्याधारो वक्ष्यति. तत्र हि रसस्समवैति. ने-
ति रसेषु भूतेष्वाकाशादिषु तिषु तत्रस्थ्यचारस्य रसस्योत्पत्तौ
विशेषेषु च मधुरादिषु निमित्तं वा खादयः। यत्खल्वेरसस्य
शन्मये विशेषा मधुरादयः स्ते खादि .. आह रसनस्य कल्प-
कत्वं रसषट्त्वग्रहणादिहि भयादि रसनेन रसानां षट्त्वं गृ-
ह्यते. एवं तर्हि षट्त्वग्रहणात् कल्पकं भविष्यति. मनश्चाल्प-
कमुक्तम्. इन्द्रियेणेन्द्रियार्थो हि समनस्को न गृह्यते कल्प्य-
ते मनसः ऊर्ध्वमुत्तमभ्यसे. रसषट्त्वं मनसैव गृह्यते. इत्ये-
वं सति मनोऽर्थ एव सोऽनः रसनार्थ उच्यते, कल्पकत्वं रसना-
त्वासंपत्तेः। एके तावन्मन्यन्ते –

यदि रसनं रसमात्रस्य ग्राहकं नन्वेतदपि कल्पकं र-
सोऽयमिति कल्पयति, यथायथा चासमात्तं कल्पय ....

नापि कल्पयति, यस्मान्नान्यो रसो मधुरादिभ्यति-
रिक्तस्तयो रसनेन गृह्येत. तस्मात् सर्वमिन्द्रियं हि विशेषैः
स्वमर्थं प्रतिपद्यते। एवं च कृत्वा रसो गृह्यमाणस्सह विशेषेण
मधुरादिना गृह्यते. न शक्यो मधुरादीन्विशेषान् प्रत्याख्याय
ग्रहीतुं षट्त्वसंख्या मनसा गृह्यताम्।

वयं तु ब्रूमहे – नैव रसनं रसस्य ग्राहकं, न च मनः कल्पकं, किं
तर्हि आत्मा ग्राहकः कल्पकश्चेन्द्रियैः करणैरिह रसो न गृहीत-
व्येन रसनः करणमन्तरा ग्रहीतुं शक्यो रस इति कृत्वा रसनामेव

ग्राहमुपचरन्ति। तद्भावे भावात्तदभावे भावात्मनस्तु सर्वार्थेषु ग्रहणम्। प्रति करणत्वेन व्यापारमन्यो न तस्य रसनस्यैव रसे ग्राह्ये ग्राहकनिर्देशः। सविकल्पकत्वेन भवति सविकल्पं न भवतु। तस्मादतीन्द्रियाः खल्वर्थाः मनसा करणेनात्मना कल्प्यन्ते। न तदन्तरेणेति मनसः प्राधान्यात् तदात्मनः कल्पकमिति भवत्युपचारः। आह द्रव्यं न स्याति इति समासो विधेयः।

उच्यते - सामान्यप्रतिषेधार्थः समासेनाहि हेतुना समाश्रयत्वं च रसंप्राति समासत्वमित्येतत् प्राप्नुयात्। ततः प्राग्वदित्यतः खल्वसमासो विधीयते। कथं प्रागेवास्मिन्नर्थे प्राधान्यं गम्यते। तदाह - निर्वृत्तौ विशेषयोरिति। कार्यं ब्रूमः - अतुल्यकालः प्रापणार्थः समासो समासे तु तुल्यकालता मेतयोस्तत्य . . . विशेषयोः प्रापयति कथमिति। नहि यस्मिन्नेव काले निर्वर्त्यन्ते रसास्तस्मिन्नेव काले विशेषो येषां मधुरादिभिः रव्यज्यते। किं तर्ह्युत्पन्नेरुत्तरकालं हृष्टं हि जातमात्राणां नामौषधीनां . . . . तदेवाचार्यस्तरुणानामौषधानामुपयोगं प्रतिषेधयति- अतिबलामजीर्णमविगतवीर्यमिति। तथा संपूर्णरसवीर्याणि काले काले इति तत्कस्मादसंपूर्णरसानां हि कर्मण्यसामर्थ्यं। तस्मान्न्याय्योऽसमासः। . . . करणकस्मान्निर्वृत्तौ विशेषे च यावत्येकेन च शब्देन समुच्चयार्थो लभ्यते। निर्वृत्तौ विशेषे चेति। उच्यते। द्वितीयस्य स्वादिषु नियोगाद्यः खलु द्वितीय श्च शब्दः स्वादिषु नियुक्तः स्वादयश्च तत्रयः . . .।

न च न्युत्क्रान्तानभिहितानि न भवन्ति। यथा . . . कारणभावात्

भावानां नाशकारणं ज्ञायते इति तत्तथमेस्थायं तल्लयुक्तौ प्रा-

प्तौ नोत्कर्षं च तत्तां प्रणयता तत्ता [illegible] समुपादेयः।

अन्ये तु व्यवस्यन्ति शौकधर्मानुरोधात् स्वादयस्त्रयः इत्ये-

तस्मिन्निर्देशे निर्योक्तव्योऽयमासीच्च शब्दः सा तु न युक्तो

यस्मिन् प्रदेशे नियुज्यमान . . . श्येत तस्मादन्यस्मिन् स्थाने

नियुक्तं चेत् अर्थमभिनत्ति, न्यायमेऽन्यस्मिन् स्थाने उपपद्यव-

र्ण्यते. कथमिति, निर्वृत्तेर्विशेषे च प्रत्ययाः स्वादयस्त्रयः।

किन्त्वापेक्षितिच, तथाच वक्ष्यति, सोमगुणातिरेकं मधु-

रमृतवा स्वादयश्च कालश्च. न खलु कालं प्रत्यारव्या याहि

निवृत्तिर्वा रसानां विशेषा मधुरादिभिर्भवन्ति। तद्यथा-

आम्रपनसलिकुचदाडिमादीनां प्रतिनियतेषु कालेषु नि-

र्वृत्तिर्नो सर्वास्मिन्निति वैषां निवृत्तमात्राणामेव रसवे . .

. . लक्ष्यते।

किं तर्हि कालपरिणामेन तस्मादुभयत्तोपपन्नः कालस्यनि-

र्वृत्तावपि विशेषवर्तेनद्दते च शब्दाच्च शक्यं लब्धं स्यादेव,

त्वित्तेन कालग्रहणं न्याय्यं कर्तुं स्वादिवत्क्रमः। उत्कर्षापक-

र्षाभावात् स्वादिवत्कालस्य न हि यथाकाशादीनामुत्कर्षा-

पकर्षविशेषेभ्यो मधुरादयो विशेषाः, तथा कालस्योत्कर्षा-

पकर्षविशेषा न सन्ति, अतो न साक्षात्स्वादिवदभिधत्तेऽका-

लं भवति तु सन्निमित्तमात्रमुत्पत्तौ विशेषे च न खलु माधुर्य-

. . तां वा कालः करोति।

किं तर्हि कालपरिणामात्तस्यैव द्रव्यस्य भूतैरापूर्यमाणस्य स-

रसः परतरो व्यक्तिं गच्छति. तद्यस्मात्सौरसोत्पत्तिसमका-

लमेव वैस्पष्टं भजति, कालान्तरेण तु भजते तस्मात्तेनकरत्वे-

नोत्पत्तौ विशेषे च कालः स्यात्। व्यापारात्तत्र्यय भावो विवर्ण्यते,

आहग्रहणं, कस्मादत्र केचिदुपादेशान्ति, व्यस्तसमस्ततार-

तम्यज्ञापनार्थं ग्रहणमिति व्यस्तादीनि च खादीनि

पृथक् समस्तानि द्वन्द्वं च सर्वाणि चत्वारतम्यं विकल्पेनबो-

त्तानो विशेषेच रसानां निमित्तं संपद्यत इत्येतत्प्रकाश-

यितव्यमिति ग्रहणमुपात्तमुपपद्यते, वैतत्कथमिति रसवै-

चित्र्योपलब्धेः, इहैकस्यामपि तावज्जातौ रसानां वैचित्र्य-

मुपलभामहे —

किंपुनर्भिन्नजातीयायां वैचित्र्यनिमित्तं यच्च तन्निमित्तभू-

तानां व्यस्तसमस्ततारतम्यादिविकल्पकृतमुक्तादिरसास्त-

त्तमाभ्यस्ता संख्यामतिपतन्ति हि, इदमत्र संप्रधार्यम्।

यदि खादयस्तत्र यो विशेषकारणं भवन्ति, तर्हि विरोधस्य ते

सोमगुणातिरेकात् मधुरो रस इति अतोत्तरमुच्यन्ते,

नखल्वयमपक्षित्यो निर्वृत्तौ विशेषाद्वा प्रत्ययत्वं निवा-

रयामः — किंतु खादीनामेव, तत्रयाणां विशेषणान्नतथा

अपाक्षेत्योरित्यतश्च खादीनामेव भूयिष्ठं विशेषकर्तृत्वं प्र-

ति व्यापारनियमो विधीयते, खादयस्तत्र इत्यन्यथातिग्र-

हणे ऽनुपदीयमाने अद्य इत्युक्ते पञ्चानामपि कारणं स्या

द्विशेषेणापरे तु पश्यन्ति, निर्वृत्तावपाक्षेति खादयश्चैवनि-

मित्तं, विशेषे तु खादय एव त्रय इति ग्रहणमेतस्यावधारणं

करोति, यत्पुनरेतदुक्तं विशेषे ऽपाक्षीति कारणं सोम-

गुणातिरेको मधुरो रस इत्युपदेशादित्यत्र ब्रूमः।

नखादीनां सान्निवेशविशेषादिह खादय एवमे त्रयः प्रत्य-

यास्तथा सन्निविशन्ते यथा सोमगुणातिरेको मधुररसो-

त्पत्तिं प्रति समर्था जायन्ते, तदेवं गम्यते, न खादय एव वि-

शेषे रसानां प्रत्यया भवन्ति। नापाक्षीति:,

इत्थं चैवं एनोदकस्थस्य रसस्य व्यक्तता नरवादीनां सन्निवेशविशेषात्, मृत्स्थस्य च शारत्तं हि लवणश्चाव्यक्तरसाश्च तथा मृत्युस्वाद्यमाना ... जायते रसो लौकिका अपि च कथयन्त्यव्यक्तरसं द्रव्यमास्वाद्य मृद इवास्यास्य उदकस्येवास्य रस इति स्यान्न तु दृष्टे दृष्टा अम्ललवणमधुरा रस इत्युच्यते, अपामपि हि भूयिष्ठ ... लवणाद्यो रसास्ते तु खादिभूतकृतामुभयत्र वाच्यं हि दृष्टं पानमपेक्षते। तस्माद्व्यक्तरसस्य रसनाविषयस्य प्रकृतौ वाद्यांश्यां वर्तमानस्य खादयो मधुरादि विशेषान् कुर्वन्ति।

आह हेतुरपाक्षेत्रि रसानां प्रत्ययास्तु खादय उत्पत्तौ विशेषे चैवं सति न कश्चित् दृष्टिर्व्यापको भवति, यावता हेतुः प्रत्ययमित्यविशिष्टमेतद्धेतुर्निमित्तमायतनं कर्ता कारणं प्रत्ययसमुत्थानं निदानमित्यनर्थान्तरमित्युक्तम्। तस्मात् खादयो हेतव इति प्राप्तं, प्रत्ययाश्चापाक्षेति ... कृत्वा न पृथगपरक्षिप्ति कमन ... पृथक्तु खादयः कथं तर्हि पठितव्यामिति रसनार्थो रसस्तस्य द्रव्यं खादयो निवृत्तौ च विशेषे च। तत्र खभादिर्येषां त इमे खादय इति पञ्चानामपि प्रसक्ति महाभूतानां भविष्यतीति विशेषो वाच्यस्ते: हेतुप्रत्ययाः सत्याः क्रियतां कथं - हेतुः अपाक्षेति- प्रत्ययास्तु खादय इति।

उच्यते - स्तेविशेषः इहासाधारणो हेतुः साधारणाः प्रत्ययाः, कथमिति शालिबीजाच्छाल्यङ्कुर एव जायते न यवाङ्कुरादयस्तच्छाल्यङ्कुरस्यासाधारणो हेतुः शालिरिवत्विमे प्रत्ययाः अग्निवायुकपृथिव्यस्तेन शाल्यङ्कुरस्यैवैकस्योत्पत्तौ निमित्तं भवति।

किं तर्हि नस्यचान्येषां चातिलमुद्गनिष्पावादीनां तस्मात्

साधारणः किंचान्यत् स्वापकारकरो हेतुः परोपकारक-

रास्तु प्रत्ययाः इह शालिरेव जातेरेव शाल्यंकुरस्योपकार-

को . . वस्तूत्पत्तिं करोतीत्यर्थः ।

अग्न्यादयस्तु भिन्नजातीयानां तिलयवमुद्गनिष्पावादी-

नां तथैको हेतुः, बहवः प्रत्ययाः शालिरेकः शाल्यंकुरो-

त्पत्तौ बहवस्तु प्रत्ययाः पृथिव्यादयस्तथा सदृशो हेतुः

विसदृशाः प्रत्ययास्तथाहि शालीनां शाल्यंकुराः सदृशाः

नैवं पृथिव्यादीनामिति तस्मादुपपन्नमायो हेतुः । क्षि-

तिश्च प्रधानेन कल्पनेन कस्माद्धेतुधर्मसंभवान्नरस-

वतो हेतुत्वमुपपद्यते प्रत्ययधर्मोपपत्तेश्च प्रत्ययभा . .

. रसादीनां यथोक्तं शालिभ्यः शाल्यंकुर एवं रसेभ्यो

रसस्य निष्पत्तिर्यस्मात् पृथिव्यां रस उपलभ्यते, तस्मा-

द्विकल्पेनानेन हेतुमुक्तानि. सतु रसाम्भस एव वैशे-

षिकगुणत्वादपास्तस्य तस्माद्धेतुप्रत्यययोर्वा नानात्व-

मिति यथा विरचितमेव क्षमं. . अह- उक्तं भवता विशे-

षे प्रत्ययाः, रसादयस्तत्र तत्र कोऽसौ विशेषः यस्यैव-

मेव प्रत्ययाः, रसादयस्तत्र इति ।

उच्यते — स्वादुरम्लोऽथ लवणः कटुकस्तिक्त एव च ।

कषाय इति षट्कोऽयं रसानां संग्रहः स्मृतः ॥

तत्र स्वादुरग्रे गृहीतः प्राधान्यात्, कथमस्य प्राधान्य-

मिति सर्वप्राणिनां जरायुजानां क्षीरसात्म्यत्वाच्च ।

रसरुधिरमांसमेदोऽस्थिमज्जौजःशुक्राभिवृद्धिप-

टीन्द्रियप्रसादनादिभ्यश्च हेतुभ्यः, किंचान्यद् शोभनत्वात्

स्वादुर्हृद्यं पिपीलिकादीनामप्यभिमतः प्रागेव मनुष्याणां

गौणमेवचेदम . . . नं स्वादुरिति कथमिति स्वदते स्वादुरि-
ति स्यादस्वादिष्वपि प्रसङ्गः। इहाम्लादीन्यपि स्वदन्ते प्रति-
नियतभक्तित्वाज्जनानां तस्मात्तेऽपि स्वादव इति प्रसक्तमु-
च्यते - तद्भूयस्त्व परिग्रहात् . . . प्रसङ्गभूयस्त्वं हि
परिग्रहेदमुक्तं, यथा रूपवान् गोमानिति। नहि तथाम्लोदय-
स्वदन्ते यथायं जातमात्राणां मधुर एव स्वदते नान्य इत्य-
तो युक्तमस्यैव स्वादुत्वं, लोकप्रत्ययवशादम्लादिषु स्वादु-
त्व . . . हि मतो भूयिष्ठं च स्वादुम्लं वादीयते जगतान
तथान्ये रसाल्लवणश्च नान्तरेण शक्यमुपयोक्तुमाहारोपयो-
गित्वात्तस्यान्तरं ग्रहणमिति . . । आह -

यद्येवं तेन तस्यैव ज्यायस्त्वाद्ग्रेऽभिधानं कार्यं
यस्मान्मधुरादीनां रसानामभिसंस्कृतानां लवणेनोपयो-
गोऽभिप्रेताउपयुज्यमानाअपि तद्दृते नरोग। यत्नोक्तमः।
नाविनाप्युपयोगाद्दृश्यते। येषां लवणेनापि विनोपयोग-
स्तद्यथाम्लमधुराणां तावदिक्षुमधुपयोमृद्वीकाराम्रो-
मृतेऽपि लवणादुपयोगः प्रतिकारः। अम्लानां चुक्रदाडिम्ब-
रूपकादिनाम् न कदाचिदपि केवलस्य लवणस्येक्षुप्र-
भृतीनामिवोपयोगः प्रीतिमादधाति, तस्मान्मधुराम्लयो-
रेव प्राधान्यं पूर्वोक्तेभ्यश्च हेतुभ्यः रसर्वप्राणिसामादिभ्यः
कटुतिक्तकषायाणां च भूयिष्ठमासवाद्यस्योपयोगस्सर्वा-
र्थः, कषायस्येत्यनुक्रमेणैषां कटुतिक्तकषायाणां पाठः।
असमासः त्रिषष्टिविधस्य विकल्पस्य प्रदर्शकः, स्वा-
दुरम्लादिभिर्योगमित्येवमादौ संग्रहणं परमतस्योद्भाव-
कं, अयं षट्कसंग्रहोऽन्येषां अष्टकसंग्रहाणां यत्नावधा-
रणार्थं इदं परिमाणमस्येति।

यदि यतो बालः इयत्तां वक्ष्यत्युत्तरत्र रसास्तु रसभा-
भ्यसाः संख्यामतिपतन्ति. तत्रासंख्येयत्वेऽपि षट्त्वे
सति प्रवृत्तिरेवेत्येतदवधारयितव्यम संग्रहणमुपदध्वे।
आह — स्वाद्वम्ललवणा वातं जयन्तीत्येवं मीमांस्यान्ते
रसत्वात प्रभञ्जनस्य इह विपरीतगुणैर्दोषाणां शमो
निर्धारितो यथोक्तं कषायस्यैवं शमयन्ति. तेन च वायो-
र्विधने रस इति मधुरादिभिरस्यानुपशमः प्राप्नोतीत्युच्य-
ते. उक्तगुणविपर्ययादेतदुत्पन्नं, रुक्षलघुशीतखर-
विशद चलदारुणाद्योऽपि गुणाः पवनस्य तद्विपरीताश्च
स्नेहगौरवौष्ण्यश्लक्ष्णपैच्छिल्यस्थैर्यादयो मधुराम्ललव-
णेषु द्रव्येषु वर्तन्त इत्युपपन्नो मधुरादिभिः समीरणस्य
प्रशमः।

एवं च युक्तिः श्लेष्मप्रकोपे मधुराम्ललवणादि . .
कथमिति समानगुणाभ्यां रसाभ्यां धातूनां वृद्धिकार-
णमुपन्यस्तं मधुररसवतश्च श्लेष्मणोऽम्ललवणाविप-
रीता शमायैव प्राप्नुतः. प्रकोपयैव दृष्टा ततः स्निग्धगुरु-
पिच्छिल मन्दादिगुणसामान्यमाम्ललवणेषु द्रव्येषु
श्लेष्मणः प्रकोपनं भवति. कश्चैकदे . . . . पैण्यभूम्न-
सामान्यस्य कोपं प्रति सामर्थ्यं निवारयितुमुत्सहते. उक्तो
(सत्वा) नाम
रसानियमः स्वस्थाम्ललवणस्वादीत्येवमादि द्रव्याणां नियम-
मं विवक्षुरिदमारेभे. "किंचिद्दोषप्रशमनं किंचिद्धातु-
प्रदूषणम्। स्वस्थवृत्तौ मतं किंचिद्द्रव्यं त्रिविधमुच्यते"
किंचिन्न सर्वमित्यभिसन्धिः. दोषस्य दोषयोः दोषाणां वा
शमनं. दोषा वातादयस्तत्र दोषशमनं यथा दुरालभा पित्त-
श्लेष्मावशोषण स्तथा रक्तशालिर्वाताल्पां . .

नहि सर्वमन्नं वातपित्तश्लेष्मणामुभयदोषाणाम-
न्यथा दोषप्रशमनमित्याचक्षेत । न किंचिच्छक्यदोषादितंल-
कथं किंचिदेवाहि द्रव्य दोषप्रशमनज्यायो भवति. तथाधा-
तुप्रदूषणं वातादीनां प्रकोपनं तद्यथा यवकमन्थकफा-
णितमूलकादि ।

अथ किंचिद्दोषप्रशमनमित्यत्त दोषग्रहणेन वातादी-
नामुपसेवनापत्ते . . वातादिशमादि च द्रव्याद्रव्याणां
दोषैर्विनिवर्तन्ते. काचिद्धास्त्रावेण रक्तस्य द्रष्टव्येनिव-
र्तते. मांसादीनां तु शमनं भवति. तथा वातादीनां तु दो-
षाणां . . . दीनां संभवति ।

अतोऽध्यायं

आह किंचिद्धातुप्रदूषणमिति धातुग्रहणेन वातादयो रसादयश्च लक्ष्यन्त इति तथ्यः . . . श्रीयेत तद्दोषादिदूषणमिति आदिशब्देन रसादयस्तथा स्वेदमूत्रपुरीषाणि गृह्यन्ते. स्वस्थाः अरोगाः वर्तनं वृत्तिः स्थेति सापनामिति यावद्‍दुक्तं स्यात्. स्वस्थानांवृत्तिः स्वस्थवृत्तिः स्वस्थायेन वर्तयन्ति यापयन्ति केन चैके तयाप्यया तयन्ति तदनुविधानो . . . . . औषधविधिना यथा तस्मात् तुषारसमये स्निग्धाम्ललवणांसान्नित्यारभ्य यावसितवर्तिकस्य सर्पिषः मानमित्येवमादि तथा हैमन्ते कदोषचयं वसन्ते प्रवाहयेदित्येवमादि तस्यां स्वस्थवृत्तौ मतमभिप्रेतम. किं तदेवंप्रकारमिति. द्रव्यंत्रिविधं तत्प्रकारमुच्यते कथ्यत इत्यर्थः। कैरित्याह यथातथ्यदर्शिभिराप्तैराह मुहुर्मुहुः किंचिद्ग्रहणं कस्मादेको वा किंचित . . . क्रियतामावहाब्रूमहे - नैकस्य तत्र्यं कारणप्रसङ्गादेकस्मिन्नापि किंचिच्छब्दे क्रियमाणे उपयुज्यमाने वा एकमेव द्रव्यं दोषप्रशमनं प्रकोपनं स्वस्थवृत्तिकरमिति प्रसक्तिः स्यान्न चैतदेष्टव्यम. तस्मात्प्रतियोगं समुपस्थेयः किंचिच्छब्दः।

आह - दोषप्रशमनमादौ कस्मादुच्यतेऽभिप्रेतत्वात् अभिप्रेतामिति दोषप्रशमइति।

आहैवं पठ्यतां. किंचिद्दोषप्रशमनं किंचिद्दूष्यदोषप्रदूषणमित्यथावश्यं धातुग्रहणं कार्यं तेनैवमेव क्रियतां. किंचिद्धातुप्रशमनं किंचिद्धातुप्रदूषणं संचक्ष्महे - धातुग्रहणमुभयस्य स्थापकं. धातुशब्दः खल्वयं वातादिषु रसादिषु च वर्तते तथा धातुग्रहणेनेदं स्थापयति. यथैव वातादीनां कि . . . . किंचिद्दूषकमिति

यदि पुनरत्र अयं दोषग्रहणं न युज्येत, तद्दोषशब्दस्य
वातादिषु योगाद् वातादिद्रव्याणां शमनकोपनधर्मौ यद्युक्ते
यातां तीरसादिषु न स्यातामिति च्यते. तथा यदि धातुप्रशमनं
धातुप्रदूषणं चेति कृतमभविष्यत धातुशब्दस्य रसादि-
ष्विव प्रायो वृत्तित्वाद्दोषाणां प्रति द्रव्यवृत्ति शमनकोपनयो-
रव्यापार इत्येतदापतत्येव।

न चैतदनुमन्यामहे - पूर्वं तु दोषप्रशमनमित्युक्त्वा
अन्ते धातुप्रदूषणमित्याचक्षाणो दोषांश्चाधिकृत्यान
शमयति. धात्वभिधानेन च रसादीनां वितन्दन्न सञ्चाल्ये-
त दोषग्रहणादेवासिद्धमेतद्यस्मान्न वातादिकोपकास्य
रसादीनां प्रकोपशमनो केवला।
किन्तर्हि य एव वातादिकोपकश्शमकश्च स एव रसादीना-
मप्येवं गते च धातुग्रहणं अपार्थकमिति. यद्यप्येवं तथा-
दर्शितमेवास्मिन्नर्थे आचार्येण विशेषतः। उक्तं हि -

अतिशीतगुरुस्निग्धमतिमात्रसमश्नताम्।
रसवाहीनि दुष्यन्ति - - - नात्। तत्र शीतगु-
रुस्निग्धादयः श्लेष्मणः प्रकोपकाः अपि तेन वायोरु-
भयं चैतद्रसस्य. शमनादिहेतुविशेषे त्वेवमादिर्विशे-
षः प्रकोपनशमनं प्रति रसादीनां दृष्टं. तथोक्तम -

आहारश्च विहारश्च यस्माद्दोषगुणैस्समः।
धातुभिर्विगुणश्चापि स्रोतसां स प्रदूषकः॥

एतदनेन गमयति - सूत्रकारो न केवलं दोषविपरीतमेवोप-
योज्यम. यथाप्यविगुणान् धातूनां तदभ्यासे व्यमन्यथा।
यद्ययमभिप्रायो नाभविष्यन्नैतावतोक्तोऽयमर्थ इति कला

तस्मायों संप्रधारणा नास्ति विशेषइति स्यात् प्रशब्दः पृथक् -

इवाभिप्रायः।

उच्यते - प्रकारेः शमनं प्रकारैश्च दूषणं कैः प्रकारा इति

मृदुमध्यादिमात्रया उत वा द्रव्यान्तर संयोग संस्कार दे-

शकालमात्रा स्वभावादयः किंचिद् द्रव्यान्तरेणान्वितं सं-

युक्तं शमकं संभवति. न केवलं तद्यथोक्तं - तैलं संयोग-

संस्कारात् सर्वरोगापहं मतम्। नहि तस्य केवलस्य स-

र्वरोगोपहति प्रति सात्म्यं तथा . . . द्रव्यान्तरसंयो-

गात् प्रकोपं तत्वन्यथा मत्स्यपयसोः संस्काराद्यथा व्री-

हिलाजासक्तूनां सिद्धपिण्डका इत्येवं शेषेष्वपि वर्ण्यः।

अन्ये त्वाधुकुर्वन्ति :

इह कश्चिदुपसर्गो धात्वर्थं स्नाति कश्चिदनुवर्तते, कश्चि-

द्विशिनष्टि अन्यतम् स्नाति तावद्यथोक्तं तान्युपास्येत न-

दोषाः स्नेहस्वप्रोपपादनैः कथा उपास्येते श्लेष्मपित्ते

व्याधावामाशयाश्रय इत्यत्रोपास्येते प्राक्शंगतेत्यर्थः।

"पूगातिनिवृत्तौ" पद्यते कश्चिदनुवर्तते तद्यथा विकर्षं-

न्नित्ययः विशिनष्टि - यथा . . . मन्विच्छेन भरद्वाजउपा-

गमत् अनुरनमान्वेच्छन्नितीच्छार्थमेवाविशिनष्टि -

उपशब्दोऽपि समीपवतेन विशिनष्टि, समीपभावेन स-

मीपं गतावनुपागमत्. तस्मादिहाप्यनुवर्तनार्थं प्रश-

ब्दो वेदितव्यः। शमनमेव प्रशमनमित्याह - मत्यन्तरा-

भावात् सूत्रानारम्भः, इह न जात्यन्तरदोषप्रकोपशमन-

स्वास्थ्यवृत्तिकारिकयामिति प्रकृतिशरीरावस्थादोषदेश-

कालबलमात्रासंयोगाद्यपेक्षितत्वाद्यादिह नामान्तराणि

जात्यन्तराणि भिन्नानि सूते द्वादशादिः दोषप्रशमनं

इतिकृत्वा सर्वस्यां प्रकृतौ सर्वासु च शरीरावस्थासु सर्वस्मिं (न्नृतुषु)
श्च दोषे देशेषु कालेषु प्रयुक्तः शमायेति . . न तु कल्पते
कथमिति वातप्रकृतिर्यत्स्थं श्लेष्मप्रकृतिसंपद्यते. एवं
संयोगान्तेषु अपि सर्वेषु व्याख्यातव्यं तथा दोषप्रकोपकमि-
ति यदि नियतं स्यात्तेन सर्वदा कोपकं दृश्येत विकल्पप्रकृ-
त्यादि विशेषाद्यथा . . . तं पश्यामः. तद्यथा क्षीणदोषस्य
. . कफमारोग्याय तथा स्वस्थवृत्तकस्थापनेऽस्मा-
त्स्वस्थस्यात्तन भवेत्त प्रयोगो दृष्टश्च. उक्तं हि –
शालेयषष्टिकैरसहृ यवागौदनलाजार्थैर्ज्वरितानां ज्वरा-
पहः. इति, तस्मादनियमस्तस्मान्नाम्नि जात्यन्तर इति कृ-
त्वा नेदं पृथक्सूत्रमारब्धव्यम् ब्रूमहे – तत एव सिद्धेः य-
द्वौ च द्रव्यान प्रकृत्यादिविकल्पे सति दोषप्रशमनधातु-
दूषण स्वास्थ्यवृत्तिकरो दृष्टिरिति।
नन्वत एवैतदावनं भवति विवक्षितश्च भावानि
द्रव्याणि दोषप्रशमनादीनि स्वभावक्रियाप्रतिबन्धस्तेषां
प्रकृत्यादिवैगुण्यादुत्पद्यते. यदीह प्रकृत्यादीनि कारणा-
नि प्रतिबन्धकानि प्रत्याख्यायैवैकमेव द्रव्यं शमने दूषणे
व्यवस्थवृत्तौ च कल्पितैवं सति न स्युरिमानि जात्यन्त-
रैर्न तु प्रत्याख्याय न खलु प्रातिकानां वैगुण्ये दुरलभा-
द्यो दोषाणां कोपना जायन्ते. किंचित्कार्यभेदाद्दोषप्र-
शमनस्यौषधस्य द्विविधं कार्यं क्षीणानां वातचयक्रियाया:
प्रकृतौ स्नापनं प्रदूषकानां तु कार्यं धातूनां ह्रासकारणेन
व्याधेरुद्रेकप्र . . . चानर्थे प्रावणम स्वास्थ्य प्रवृ-
त्तिकस्य तु समधातुपूर्वो सधातुवृत्त्या। विकारप्रादुर्भावः.
कार्यं स्वभावभेदाच्च इह च लोके प्रसिद्धो द्रव्याणां

ग्राहि भेदित्वा . . दस्थापनीयादि प्रतिनियतस्व-
भाव: प्रकृत्यादि विकल्पे च दृष्टस्ते षां स्वकर्म प्रतिब-
न्धः। नन्वेवं गतेऽपि शक्यः वक्तुं तत्स्व भावानि तानीति
समासतोपदेशाच्च यथैतत्पथ्यं चामियतमापत्स्यते,
नाभविष्यदयमुपदेशः . . पथ्यमिहैकान्त . . कंस-
मशानं मन्त्रमिति आप्तवचन प्रमाणाच्च आप्तवचनप्रा-
माणिकात्वयमिदं चाप्तवचनं पथ्यापथ्ये अधिकृत्य
लोहित शालयः शूकधान्यानां पथ्यतमे श्रेष्ठतमा भव-
न्ति. यवानां शूकधान्यानां पथ्यत्वे प्रकृष्टतमा भवन्ति,
तद्यदेतन्निश्चयेन पथ्यापथ्ये स्यातामा।
नैमेवीत संशया याथातथ्याद्दश . . नः क्षीणकर्मकल्म-
षाः शीर्षाउपदेशयुक्ताः। तस्मात् पथ्यापथ्ये अर्थान्त-
रं यस्तुनमेन्दमाधिकृत्योपनीतमलात्यनुनय . .
इयत्तां एतावत्खलु तत्तोपरिभाषितं तिदोषकोपे
मन्दकं, ततु कोचेत्पथ्यमित्युक्तमितः स्वमतिपरिक-
ल्पितेयमायुष्मतो विदित व्यायामपि (वा) साक्षीण .
. . तदपि पूर्व प्रमाणाधानात्।
क्षीणदोषस्य खलु दोषाभिः क्षयः . . . मुपदिश्य-
तेकथं यत्तत आद्यप्रमाणमःअलिस्यरध्यात मरोगय-
हेतुः. पश्चादपितस्य बद्धच्छेमण इत्येवंप्रकारमानन्द-
नेन दोषाभिवृद्धिं कृत्वाधीयते, इतश्चात् प्रकोपक्रमे
वेति गृह्यताम्, तदुत्तरकालमनर्थफलत्वाद्यथेहित दोष-
प्रमाण पूरणात्वाक ऊर्ध्वमभ्यस्येत। संशयमनर्थमाच-
क्ष्महे- देव यस्वास्थ्य प्रवृत्तिकरं सत संमेषणुपयुज्य-
मानं गुणमेवावगत्याच्च्यच्छेदेन साम्यमनुवर्तयन्

बालादीनामन्येषां च शरीरधातूनामयं विशेषः। नहि
स्वास्थ्यवृत्तिकं दोषघ्नत्वं दोषप्रकोपकत्वं वापेक्ष्यमव-
तिष्ठति किन्तु न खलु रसादीनां शरीरधातूनां स्रोतसामेव रु-
ध्येन यद्वृत्तिः रोगमार्गत्रयस्य स्वतत्स्वास्थ्यवृत्तिकर-
मित्युक्तं च पथ्यं पथोऽनपेतं यदित्येवमादि . . नचाव-
श्यं दोषघ्नमेव स्वस्थवृत्तिकमभिप्रेतं तथा ह्ययं तैत्ति-
रिकाक्रमाच्चैदाडिमादीनि निर्दोषत्रयशमनानि यवा-
स्यलावजीवन्तीमृद्वीकादीन्यभिदधाति। तस्मात्प्र-
तिपक्षस्य दोषप्रशमनमेव स्वास्थ्यवृत्ति . . कर . .
पूर्वाभ्यामविशेष स्वस्थवृत्तस्य तद्यस्मात् स्वस्थवृत्ति-
दोषाणां प्रशमनं करोति। प्रकोपं च तद्यथोक्तमृद्धिधा-
नाख्ये स्वस्थवृत्ते तस्मात्तुषारसमये स्निग्धाम्ललवणान्
रसानुपयुञ्जीत।

तेष्वुपयुज्यमानास्तस्मिन् काले प्रबलं मातरिश्वानं शम-
यन्ति। श्लेष्मणश्चाभिवृद्धिमादधाति। उक्तं हि ——

"अद्भिश्च वै पृथिवीभिश्च मधुराभिश्चितः कफः।"

इत्येवं कृत्वा पूर्वाभ्यामविशेषं स्वस्थवृत्तमिति पृथगनार-
भ्यमुच्यते- यदुक्तं स्निग्धाम्ललवणा रसाः तदोपयु-
ज्यमाना समीरणं शमयन्तीति। तन्न। कस्मात्तर्हि माभूद्वा-
यो . . लब्धवा प्रकोप इत्यत एषां उपयोगः स्निग्धा-
दीनां मानमो . . . संयुक्तं लभते देहजं तदा रसं हि नस्य-
तो वायुः शीतशीते न प्रकुप्यति। तस्मात् स्वास्थ्यानुवृत्य-
र्थमेवैष विधिरवगम्यतां। यत्पुनरेतदुक्तं कफवृद्धिस्वास्थ्य-
प्रतीकाराद्विधानादित्युपधार्यतां, कालोऽत्रादितः कालोहि
तदा श्लेष्मच यस्य कारणं भवति।

उक्तं हि — अद्भि: औषधीभिश्च मधुराभिश्चितः क-
फ इति, तस्मिंश्च काले भूयिष्ठमम्ललवणानां औषधीनामा-
दानं, न तथा मधुराणां स्निग्धाम्ललवणान् रसानुपयुञ्जी-
त, तदस्मादेवं विधानामौषधीनां मां [illegible] कालक्रमो
मधुरः पाको निवर्तते, ततः श्लेष्मापचयकारणं मधुरः
पृष्ठविण्मूत्रविपाकः कफ [illegible] शुक्रल इति संहितावच-
स्मिन्काले भवत्यौषधीनां अपां च वक्ष्यति ह्यस्मिन्का-
ले अन्यथाभूतमपामौषधीनां च पाकं वर्षास्वाम्लविपा-
क पाकाभिरद्भिरौषधीभिस्तर्पयेति च तस्माद्सामर्थ्यं स्वा-
स्थ्यवृत्तिकरस्य दोषचयं प्रत्येकं पञ्च कृत्वा कालाश्रयं ह्य-
स्मिन्नर्थे प्राधान्यात् विद्यमानमप्यसामर्थ्यात् स्वास्थ्य-
वृत्तिकरं न च कारणत्वेधि करोति।

आह — सो हि चेतनावान् यतश्चात्मा ततः कर्तो निरुच्यते,
अचेतनत्वाच्च मनः क्रियावदपि नोच्यते - किं चान्यत् अशु-
क्तत्वाच्च, यदा चेतनः स्वस्थं न शमयति न कोपयति, दोषं
तदा किमितमुच्यतां, तस्मात् पूर्वाभ्यां भावाकार मन्यदेव
स्वस्थवृत्तिकरन्नामेति समर्थयस्व, किं चान्यविशेषात् य-
स्यापि स्वास्थ्यवृत्तिकरं दोषान् शमयति, तथापि विशेषेण
तत् स्वस्थवृत्तौ हितमिति कृत्वा स्वस्थवृत्तिकरमित्युच्यते,
न दोषप्रशमने प्रसङ्गः दोषप्रशमनमप्यारोग्ये कर्तव्यम-
तं तस्मात् प्रसक्तिः स्यात्। न चैतदेव ज्ञानं तस्मादेनदपि -

क्रियामहे नैवमुच्यतां किमिदं स्वस्थवृत्तौ मतं

मतमभिप्रेतं तं पूजितं चेति गम्यतां निर्दिष्टं चेतदाह-
आरोग्ये मतमित्यस्तु, उच्यते, न दोषप्रशमने प्रसङ्गः दोषप्रशम-

नचैतदनुजानीमस्तस्मादेतदपिनाद्रियामहे - इहोभयथा विगृह्यमाणस्सञ्चयः यदितावत्प्रशमप्रकोपनस्वस्थवृत्तिकारणं द्रव्यं तेन रसवीर्यविपाकप्रभावानां पर्युदासः आपन्नः, उत्प्रशमनप्रकोपनस्वस्थवृत्तान्येव द्रव्याणि तेनान्यकार्यासंभवो निर्धारणात्. तस्माद्यदुक्तं . . . भवति. भक्ष्यैर्जीवेद्वर्षसहस्राणि तावत्तेजगतयौवनं। सौहित्यमेषां हत्वातु भवत्यमरसन्निभः॥ इत्येवमादिरसायनोपयोगोनसंभवति। तथाजरापरिणतो न्यपेतोयोगेनानेनाविन्दति नारोग्यत्वं सुविपुलंयुवेवसनुमश्यतीति स्यात्संभवोनिवारणा. चद्धमनकोपनस्वास्थ्यवृत्तिकान्येव करोति। द्रव्यन्नान्यद्धित्युच्यते, सर्वथासिद्धिः।

यदितावद्द्रव्यावधारणं तद . . . यथाश्रितानां रसवीर्यादीनां सिद्धिः प्रशमनोपस्वस्थवृत्तिषु कार्येषु यस्मान्न रसादीनां द्रव्यं प्रत्याख्याय भावः. एवं च कृत्वाद्रव्यग्रहणात्तदाश्रितानामपि रसादीनां सएवधर्मः परिगृहीतो भवति. त्रिविधो दोषप्रशमनादीनि कार्याणि धारणे सरसायनवाजीकरणयोः . . . युक्त्येति वाजीकरणे हि स्वास्थ्यवृत्तिप्रकर्षएवोक्तं हि स्वस्थे स्यात् . . . स्वरं यन्तद्द्रव्यं तद्रसायनमिति तस्मादेतदपिसिद्धमाह - त्रिविधग्रहणानर्थक्यं यस्मात्त्रिविधमेवेदं शारिसंख्यातं ग्रन्थे, द्रव्यं तस्मात् संख्यानिरर्थकात्रुमोऽवधारणार्थमानन्त्येपि हि द्रव्याणामियंइमीति प्रकारागानि यावत् खल्वचराचरे जगति द्रव्यं किंचिद्दोषशमनं च स्यात्। दोषकोपनं वा स्वस्थवृत्तिकरं वानन्यत्तु चतुर्थं द्रव्यापांगति रस्तीत्येन न्निवारयति।

तत्पुनास्त्रिविधं ज्ञेयं जंगमोद्भेदप . . . इत्यादि

दोषशमनप्रकोपनास्वास्थ्यवृत्तिकरं भूयो भ्यो सेन्प्रकारे-
ण जङ्गमादीनां । त्रिविधं वैदिन्थं स्यात् षड्विधमेव प्राप्नोति ।
तत्र त्रिविधं पूर्वोक्तं त्रिविधमिति तन्नान्यत्वात्, यत्तद्दो-
षशमन प्रकोपन स्वास्थ्य वृत्तिकरं त्रिविधमुक्तं जङ्गमं वा
स्यात् । औद्भिदं वा पार्थिवं वा तद्दोषप्रशमनं वा स्यात्, दोष-
प्रकोपनं वा स्वास्थ्यवृत्तिकरं वा तस्य त्रित्वमेवेत्याह —

(ब) संस्वेदजाग्रहणे कोऽभिप्रायः, संस्वेदजानामपि यस्मा-
दिह शास्त्रे तत्तो तद्यथोक्तं चतुर्विधा योनिः जरायुजाण्डजो-
द्भिजं संस्वेदजामिति ब्रूमो जङ्गमेन गृहीतत्वाद्याः खल्विमाः
प्राणिजातयः संस्वेदजाः क्रिमिकीटसरीसृपादयस्तासां ज-
ङ्गमग्रहणाद्वरोधः, तथायद्यन्यत्संस्वेद . . . .
लवणादि तस्योद्भिद्पार्थिवोपदेशेनासिद्ध उपदेशज्ञाने
कृत्वा एताभ्यो नेदं भावान्तरमित्यतो नोच्यते पृथगभि-
. स्यचेतनं एतज्ञातिमन्तस्थं जंगमामिति मध्वादिष्वजं-
गम द्रव्यप्रसक्तिः न ह्यमूनि गतिमन्ति वा चेतनानि वा जं-
गमानि वा अमूनि कृतोक्तानि. उच्यते - यस्य यस्य जगतो
जन्म तस्य तदुपचारस्तद्यथा कपोतेभ्यो जातः सोऽपि कपो-
त इत्युच्यते ।

तथा जङ्गमाद्धो हि निष्पन्नो भावः सोऽपि जङ्गममेव स्यात्,
एवं सति दोषः स्यात्, जंगमेभ्य एव तान्यभिनिष्पन्नान्युप-
युज्यन्ते, नैतानि स्वयं जंगमादीनीति । आह — यद्येवं स्यात्
जंगमोद्भि . . . पदार्थे यन्न पठेत् तस्माद्यथोक्त एव स-
माधिरस्मिन्नर्थे सुवर्णसमलोहपञ्चलोहाः ताम्ररजत-
त्रपुसम रस्तत्र स्वसिद्धानां ग्रहणं मलास्तेषां । शिलाजतु-
[illegible]

तेषां पार्थिवं शिलाजतु तत्त सुवर्णस्य ग्रहणोपदेशं करो-
ति। नहि नह्लोह इति स्यादत्त समस्त पञ्चलोहाद्यमिपदतः
पृथक सुवर्णों भवीयानस्य सौवर्णं शिलाजतुनो; ननु तो-
भवति परिग्रह इति, तन्न, रसायनेषु तस्य वचनात कर-
. . . पर्णगं उतवा न वयं ब्रूमः, एषामेव मनाक्शिलाज-
तूनि किं खलु येन संभवत्येषां मलासौःसह पञ्चलोहा-
भौम मौषध्यमित्याहौद्भिदस्याग्रे परिसूतितस्य प्रागभ-
भिधानं कस्मान्न पुनरस्तो विधं त्रेयं जंगमौद्भिदपार्थिव-
मिति तत्किमर्थं भौमं प्रथममभिधीयते।
ब्रूमः — बह्वभिधेयत्वात बह्वभिधानीयं औद्भिदे —
पार्थिवे तस्मान्नदादौ युक्तिरस्य विस्तारेण व्याख्यानं
करिष्यति। आहो कं वनस्पतिर्वै . . . वानस्पत्याः त-
थौषधीरिति, तत्किमेषां नानात्वमित्युच्यते, फलैर्वनस्प-
तिर्यस्य फलं केवलमुपलभ्यते, न पुष्पं स वनस्पतिः।
तद्यथा- प्लक्षपनसोदुंबरन्यग्रोधाश्वत्थादिः, अथवा, वानस्प-
त्यः ब्रूमः — पुष्पैर्वानस्पत्यः किं पुष्पै . . . फलैरपि।
अपि शब्दस्समुच्चये वर्तते, पुष्पैश्च फलैरित्यर्थः। यथाम्र-
बदरखर्जूरदाडिमामलकादयः।
आह – समासवचनं कस्मात्स फलस्यैव व्यक्तमासीत, वान-
स्पत्यः पुष्पफलाभ्यामित्यु . . . पुष्पफलवतां वानस्पत्या
नुपपत्तेः। एवं सति एषां पुष्पमेव . . . न फलं विदुलादीनां
